# Shri Hanumachchatvarimshika

# श्रीहनुमच्चत्वारिंशिका

## Document Information

Text title : Hanumat Chatvarimshika

File name : hanumachchatvAriMshikA.itx

Category : hanumaana, chAlisA

Location : doc_hanumaana

Author : Swami Ramabhadracharya

Transliterated by : Vishal Pandey

Proofread by : Vishal Pandey

Acknowledge-Permission: Shri Tulasipitha Seva NyasaH, Swami Ramabhadracharya https://jagadgururambha

Latest update : September 14, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 14, 2024

*sanskritdocuments.org*

# श्रीहनुमच्चत्वारिंशिका

श्रीगुरुपदपङ्कजनखज्योतिर्मनसि निधाय ।
हनुमच्चत्वारिंशिकां गृणे हरिं प्रणिधाय ॥

अथ सीतापतिचरणरतहनुमन्तं प्रणमामि ।
देहि रामपदरतिमहं त्वामिह शरणं यामि ॥

जय हनुमन्मतिमन्दिरसुन्दर ।
जय रिपुकटकपयोनिधिमन्दर ॥ १॥

जय धृतराघवमानसधामन् ।
भूविश्रुतमारुतसुतनामन् ॥ २॥

जय मण्डितरणरङ्ग कृपालो ।
रामदूत जय दीनदयालो ॥ ३॥

जयतु कनकगिरिसदृशशरीरः ।
वेगिविडम्बितगरुडसमीरः ॥ ४॥

शिवविग्रहपूजितरघुवीरः ।
ब्रह्मचर्यरतसंयमधीरः ॥ ५॥

वन्दे वन्दिचरणजलजातम् ।
आञ्जनेयभवसत्कृतवातम् ॥ ६॥

धृतकलकुण्डललसदुपवीतः ।
कुञ्चितकुन्तलपरमविनीतः ॥ ७॥

खलमदहरकर्कशलाङ्गूलम् ।
सततं जनयति रिपुहृदि शूलम् ॥ ८॥

चन्द्रवदनबलनिधिभुजदण्डः ।
वक्षःस्थलवरपविनखचण्डः ॥ ९॥

रोमरोमप्रतिलेखितरामः ।
वज्रदेहपूरितजनकामः ॥ १० ॥

प्रबलपराक्रमविषमकरालः ।
महाकालमदहरखलकालः ॥ ११ ॥

केसरिनन्दनजनसुखदायी ।
मानसकथासुधारसपायी ॥ १२ ॥

राघवचरवरमोदविधाता ।
सीतान्वेषकवानरत्राता ॥ १३ ॥

सुरसासिंहिकादिमदहर्ता ।
कौतुकजलनिधिलङ्घनकर्ता ॥ १४ ॥

दुष्टलङ्किनीकैतवहर्ता ।
भक्तविभीषणतोषणकर्ता ॥ १५ ॥

दृष्टविरहरतकृषतनुसीतः ।
दत्तमुद्रिकानाशितचिन्तः ॥ १६ ॥

श्रुत्वा रामकुशलमथ सीता ।
त्वामाशिषामोदयदभीता ॥ १७ ॥

जयत्यशोकविपिनश्रीहर्ता ।
अक्षविमर्दनखलसंहर्ता ॥ १८ ॥

कृतघननादशक्तिमदनाशः ।
अङ्गीकृतरावणसुतपाशः ॥ १९ ॥

दशमुखबोधकविगताशङ्कः ।
पुच्छहुताशनदाहितलङ्कः ॥ २० ॥

सीतातोषणधृतलघुरूपः ।
स्वीकृतचूडामणिकपिभूपः ॥ २१ ॥

तीर्णवारिनिधिमोदितकीशः ।
प्रमुदितविहितकोसलाधीशः ॥ २२ ॥

परिष्वज्य हनुमन्तं रामः ।
बहुप्रशंससजलघनश्यामः ॥ २३ ॥

जयति सुकण्ठशोकभयनाशी ।
जयति विभीषणभाग्यविकाशी ॥ २४॥

जयति पदाश्रितसेवकपाता ।
शाब्दिकमणिसामश्रुतिगाता ॥ २५॥

कालनेमिमकरीसंहारी ।
लक्ष्मणजीवनजनभयहारी ॥ २६॥

रामचन्द्रसुखसिन्धुनिशेशः ।
विकलभरतजलजातदिनेशः ॥ २७॥

जयति पवनसुत घातितवाली ।
महावीर बलविक्रमशाली ॥ २८॥

जय नतसुरवर जय वानरचर ।
जय रणकर्कश जय राघवचर ॥ २९॥

जय सीतासुत विशदपराक्रम ।
जय हृतभक्तशोकसंशयभ्रम ॥ ३०॥

जय रघुवीरपयोधरचातक ।
जय कपीश दशमुखकुलघातक ॥ ३१॥

यातुधानकुलकमलतुषारः ।
रामचन्द्रजनजीवनसारः ॥ ३२॥

सीताशोकपयोधरवायुः ।
सकलसिद्धिदाता दीर्घायुः ॥ ३३॥

रामभक्तिनिधिभाण्डागारम् ।
नौमि कृताञ्जलिपवनकुमारम् ॥ ३४॥

रामकथारसरसिकमुदारम् ।
नौमि विरतिरतिगेहमपारम् ॥ ३५॥

शरणागतवत्सल कपिदेव ।
द्रवतु शिशौ मयि कृतप्रभुसेव ॥ ३६॥

तारय पापपयोनिधिलीनम् ।

कीश पाहि मां शिशुमतिदीनम् ॥ ३७॥

कुटिलकुभाग्यकुमतिकुसमाजम् ।
पाहि कपीश पापिकुलराजम् ॥ ३८॥

जय जय जय हनुमन्सुखसिन्धो ।
दयां विधेहि प्रणतजनबन्धो ॥ ३९॥

गिरिधरमेनमभाग्यमनाथम् ।
दृष्ट्वा दर्शय रघुकुलनाथम् ॥ ४०॥

रामदूत पवमानसुत दत्तभक्तविश्राम ।
सीतारामयुतो विहर गिरिधरहृदि अभिराम ॥

हनुमच्चत्वारिंशिकामिमां पठतु यदि कोऽपि ।
गिरिधरगीतां रामपदरतिं याति किल सोऽपि ॥

इति श्रीहनुमच्चत्वारिंशिका सम्पूर्णा ।

प्रणेतारः - महाकविमहामहोपाध्यायश्रीचित्रकूटतुलसीपीठाधीश्वर
जगद्गुरुरामानन्दाचार्यस्वामिरामभद्राचार्यमहाराजाः ।

Encoded and proofread by Vishal Pandey

*Shri Hanumachchatvarimshika*
pdf was typeset on September 14, 2024

Please send corrections to *sanskrit@cheerful.com*